# શ્રીગોપાલદેવાષ્ટકમ્

Shri Gopaladevashtakam

sanskritdocuments.org

March 16, 2019

# Shri Gopaladevashtakam

# શ્રીગોપાલદેવાષ્ટકમ્

## Sanskrit Document Information

Text title : gopAladevAShTakam

File name : gopAladevAShTakam.itx

Category : vishhnu, krishna, aShTaka, vishvanAthachakravartina, stavAmRRitalaharI

Location : doc_vishhnu

Author : Vishwanatha Chakravarti

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Proofread by : Jan Brzezinski, Neal Delmonico

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 16, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 16, 2019

*sanskritdocuments.org*

Shri Gopaladevashtakam

# શ્રીગોપાલદેવાષ્ટકમ્

મધુરમૃદુલચિત્તઃ પ્રેમમાત્રૈકવિત્તઃ
    સ્વજનરચિતવેષઃ પ્રાપ્તશોભાવિશેષઃ ।
વિવિધમણિમયાલઙ્કારવાન્ સર્વકાલં
    સ્ફુરતુ હૃદિ સ એવ શ્રીલગોપાલદેવઃ ॥ ૧॥

નિરુપમગુણરૂપઃ સર્વમાધુર્યભૂપઃ
    શ્રિતતનુરુચિદાસ્યઃ કોટિચન્દ્રસ્તુતાસ્યઃ ।
અમૃતવિજયિહાસ્યઃ પ્રોચ્છલચ્ચિલ્લિલાસ્યઃ
    સ્ફુરતુ હૃદિ સ એવ શ્રીલગોપાલદેવઃ ॥ ૨॥

ધૃતનવપરભાગઃ સવ્યહસ્તસ્થિતાગઃ
    પ્રકટિતનિજકક્ષઃ પ્રાપ્તલાવણ્યલક્ષઃ ।
કૃતનિજજનરક્ષઃ પ્રેમવિસ્તારદક્ષઃ
    સ્ફુરતુ હૃદિ સ એવ શ્રીલગોપાલદેવઃ ॥ ૩॥

ક્રમવલદનુરાગસ્વપ્રિયાપાઙ્ગભાગ
    ધ્વનિતરસવિલાસજ્ઞાનવિજ્ઞાપિહાસઃ ।
સ્મૃતરતિપતિયાગઃ પ્રીતિહંસીતડાગઃ
    સ્ફુરતુ હૃદિ સ એવ શ્રીલગોપાલદેવઃ ॥ ૪॥

મધુરિમભરમગ્ને ભાત્યસવ્યેઽવલગ્ને
    ત્રિવલિરલસવત્ત્વાત્યસ્ય પુષ્ટાનતત્વાત્ ।
ઇતરત ઇહ તસ્યા મારરેખેવ રસ્યા
    સ્ફુરતુ હૃદિ સ એવ શ્રીલગોપાલદેવઃ ॥ ૫॥

વહતિ વલિતહર્ષં વાહયંશ્ચાનુવર્ષં
    ભજતિ ચ સગણં સ્વં ભોજયન્ યોઽર્પયન્ સ્વમ્ ।
ગિરિમુકુટમણિં શ્રીદામવન્મિત્રતાશ્રીઃ
    સ્ફુરતુ હૃદિ સ એવ શ્રીલગોપાલદેવઃ ॥ ૬॥

અધિધરમનુરાગં માધવેન્દ્રસ્ય તન્વં-
  સ્તદમલહૃદયોત્થાં પ્રેમસેવાં વિવૃણ્વન્ ।
પ્રકટિતનિજશક્ત્યા વલ્લભાચાર્યભક્ત્યા
  સ્ફુરતુ હૃદિ સ એવ શ્રીલગોપાલદેવઃ ॥ ૭॥

પ્રતિદિનમધુનાપિ પ્રેક્ષ્યતે સર્વદાપિ
  પ્રણયસુરસચર્યા યસ્ય વર્યા સપર્યા ।
ગણયતુ કતિ ભોગાન્ કઃ કૃતી તત્પ્રયોગાન્
  સ્ફુરતુ હૃદિ સ એવ શ્રીલગોપાલદેવઃ ॥ ૮॥

ગિરિધરવરદેવસ્યાષ્ટકેનેમમેવ
  સ્મરતિ નિશિ દિને વા યો ગૃહે વા વને વા ।
અકુટિલહૃદયસ્ય પ્રેમદત્વેન તસ્ય
  સ્ફુરતુ હૃદિ સ એવ શ્રીલગોપાલદેવઃ ॥ ૯॥

ઇતિ શ્રીવિશ્વનાથચક્રવર્તિઠક્કુરવિરચિતસ્તવામૃતલહર્યાં
    શ્રીગોપાલદેવાષ્ટકં સમ્પૂર્ણમ્ ।

---

*Shri Gopaladevashtakam*

pdf was typeset on March 16, 2019

Please send corrections to *sanskrit@cheerful.com*